श्री हयग्रीवाष्टकं

श्री हयग्रीवाष्टकं

हयाननं हयग्रीवं हारनूपुरशोभितं |
पीतांबरधरं देवं हयग्रीवमुपास्महे || 1 ||

कुंदेंदुशंखधवळं पद्मपत्रनिभेक्षणं |
शंखचक्रधरं देवं हयग्रीवमुपास्महे || 2 ||

मुक्तादामसमायुक्तं नेमिकोटिसमप्रभं |
रत्नकुंडलकेयूरं हयग्रीवमुपास्महे || 3 ||

शेषासन समासीनं लक्ष्मीनीलासमन्वितं |
श्रीवत्सकौस्तुभधरं हयग्रीवमुपास्महे || 4 ||

योगासनसमासीनं वेदशास्त्रसमन्वितं |
सर्ववेदांततत्त्वज्ञं हयग्रीवमुपास्महे || 5 ||

श्वेतवर्णं चतुर्बाहुं वैजयंतीविराजितं |
सर्वाभरणसंयुक्तं हयग्रीवमुपास्महे || 6 ||

मणिपीठसमासीनं मकुटोज्ज्वलमंडितं |
मुक्ताहारधरं देवं हयग्रीवमुपास्महे || 7 ||

ब्रह्मांडकोटिगर्भस्थं मंदहाससुशोभितं |
सर्वविद्याप्रदं देवं हयग्रीवमुपास्महे || 8 ||

हयग्रीवाष्टकं पुण्यं ये जनाः समुपासते |
आयुर्वृद्धिः बलं धैर्यं विद्याबुद्धिसुखप्रदं || 9 ||

आप्नयुः सकलान् कामान् सर्वत्र विजयं शुभं |
सर्वपापप्रशमनं हयग्रीवप्रभावतः || 10 ||

इति श्री हयग्रीवाष्टकं ||